# SANSKRIT, Paper-II

O.S.S.C. CLASSICAL GROUP

*(Main language)*

**Parts A and B**

**Time : 3 hours 15 min.]** **[Maximum Marks : 80**

**Instructions :**

1. *Answer the questions under **Part-A** on a separate answer book.*
2. *Write the answers to the questions under **Part-B** on the Question paper itself and attach it to the answer book of **Part-A**.*

---

## Part-A

**Time : 2 hours 45 minutes** **Marks : 60**

सूचना :

(1) सुस्पष्टा संस्कृतभाषा देवनागरीलिपिश्चोपयोक्तव्ये।

(2) प्रश्नानां समाधानानि पृथक्पत्रे लेखनीयानि।

(3) प्रश्नपत्रपठनार्थं 15 निमेषाः देयाः।

**I. भावावगमनम् - प्रतिस्पन्दनम् ।**

(अ) अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु। *5×1=5*

**1.** ततो निशानाथहीनेव निशा, दिनकरहीनेव दिनश्रीः, वियोगिनीव योषित् , शक्ररहितेव सुधर्मा, न भाति भोजभूपालसभा रहिता कालिदासेन।

प्रश्नाः

अ. निशा केन विना न भाति?

आ. दिनकरेण का भाति?

इ. अस्मिन् वाक्ये स्त्री इत्यर्थबोधकं पदं किम् ?

ई. सुधर्मा केन भाति?

उ. भोजभूपालसभायां मुख्यः कः ?

(आ) अधः दत्तं गद्यांशं पठित्वा प्रश्नानां समाधानानि लिखन्तु। $5 \times 1 = 5$

2. विराटराजस्य गोधनं कौरवाः बध्नन्ति। तद्वार्तां गवाध्यक्षः अन्तःपुरस्थाय उत्तरकुमाराय निवेदयति। तदा उत्तरः प्रगल्भान् प्रतिश्रुत्य बृहन्नलां सारथिं प्राप्य युद्धाय गच्छति। किन्तु तत्र युद्धभूमौ कुरुसेनां दृष्ट्वा भीतः बृहन्नलया कथ्यमानोऽपि पलायितुमुपक्रमते।

प्रश्नाः

अ. विराटराजस्य गोधनं के बध्नन्ति?

आ. गोग्रहणवार्तां उत्तरकुमाराय कः निवेदयति?

इ. उत्तरकुमारः कुत्र तिष्ठति?

ई. उत्तरः कां सारथिं प्राप्तवान् ?

उ. कुरुसेनां दृष्ट्वा कः भीतः ?

(इ) अधः दत्तम् अनुच्छेदं पठित्वा पञ्चविभिन्नप्रश्नान् लिखन्तु। $5 \times 1 = 5$

3. विद्यालयस्य महाद्वारे श्वेतशिलाफलके पुरा तत्र स्थित्वा विद्यया कीर्तिम् आर्जितवतां महताम् आचार्याणां नामानि टङ्कितानि। चतुर्षु द्वारेषु चत्वारो द्वारपालाः। ते खलु महाविद्वांसः। विद्यार्थिनः प्रवेशं ते किल निश्चिन्वन्ति। विद्यार्थिनः भाषाम्, अष्टाध्याय्यादि मूलग्रन्थानां परिज्ञानं, बुद्धिशक्तिं, शीलं चेति एकैकम् अपि अंशं कूलङ्कषं परीक्ष्य एव प्रवेशः दीयते। प्रायशः दशसु द्वावेव प्रवेशं प्राप्नुतः सुदैविनौ।

प्रश्नाः

अ.

आ.

इ.

ई.

उ.

(ई) अधः दत्तम् अनुच्छेदं आन्ध्रभाषया अनुवदन्तु। $1 \times 5 = 5$

4. संस्कृतनाटककर्तृषु अन्यतमः भवभूतिः। विदर्भदेशे पद्मपुरं अस्य जन्मस्थानम्। अयं भट्टगोपालस्य पौत्रः। जातुकर्णीनीलकण्ठयोः पुत्रः। अस्य गुरुः ज्ञाननिधिः।

(उ) अधः दत्तानि वाक्यानि संघटनाक्रमेण पुनः लिखन्तु। $5 \times 1 = 5$

5. अ. विषमे स्थाने तु स एक एव कविः ।

आ. अहो कवयः इयं समस्या पूर्यन्ताम् ।

इ. अहो! इयं साक्षात्सरस्वती पुंरूपेण सर्वेषामस्माकं परित्राणायागता।

ई. अष्टवासरावधिमभिधेहि।

उ. ततोऽद्यैव मध्यरात्रे निगूढमेव गच्छामः सम्पत्तिसम्भारमादाय।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

(अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु। $5 \times 3 = 15$

6. एलिसरः परिचारिकां अन्यभाषां न वदन्तु इति कठोरं किमर्थं सूचितवान्।

7. "चन्द्रापीडस्य विद्याभ्यासः" इति पाठस्य रचयितुः रचनाविधानमुद्दिश्य लिखन्तु।

8. भवान् / भवती वृक्षरक्षणाय किं करोति?

9. मानवाः धनिनः कथं भवन्ति?

10. छात्राः गुरुं कथं तोषयन्ति?

(आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु।

11. कस्य जीवनं मरणसदृशं भवति? $2 \times 5 = 10$

*अथवा*

"किं जलम् उत्तमम्" इति पाठ्यभागस्य सारांशं स्वीयवाक्यैः लिखन्तु।

**24(B)**

# SANSKRIT, Paper-II

O.S.S.C. CLASSICAL GROUP

*(Main language)*

**Parts A and B**

**Time : 3 hours 15 min.]** **[Maximum Marks : 80**

**Instruction :** *Write the answers to the questions under* **Part-B** *on the Question paper itself and attach it to the answer book of* **Part-A**.

## Part-B

**Time : 30 minutes]** **[Marks : 20**

**III.** भाषांशाः

(अ) रेखाङ्कितपदस्य समानार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु। *2×1=2*

**1.** भूमेः सहजोपग्रहः इन्दुः। [ ]

(A) सूर्यः (B) शनिः

(C) चन्द्रः (D) बुधः

**2.** व्यवहारज्ञानाय मानवाः वार्तालापं कुर्वन्ति। [ ]

(A) सल्लापः (B) सीवनम्

(C) स्नेहम् (D) सेचनम्

(आ) रेखाङ्कितपदस्य समुचितं विरुद्धार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु। *2×1=2*

**3.** शबरी रामाय मधुराणि फलानि समर्पितवती। [ ]

(A) कषाय (B) कटु

(C) आम्ल (D) तिक्तानि

4. अर्चक: प्रात: एव देवालयं उद्घाटयति। [ ]

(A) आगच्छति (B) पिदधाति

(C) त्यक्ष्यति (D) निर्गच्छति

(इ) अध: दत्तानां प्रश्नानां समाधानानि निर्देशानुसारं लिखन्तु। *14×1=14*

5. "अम्मयम्" इति पदस्य सन्धिनाम चिन्वन्तु। [ ]

(A) ष्टुत्वसन्धि: (B) जश्त्वसन्धि:

(C) श्चुत्वसन्धि: (D) अनुनासिकसन्धि:

6. यणादेशसन्धे: सम्बद्धं पदं चिन्वन्तु। [ ]

(A) आगतेष्वेक: (B) चिन्तैव

(C) कोऽपि (D) कपटोपायम्

7. "भिषग्वरेण्य:" इति पदस्य समासनाम चिन्वन्तु। [ ]

(A) द्वन्द्वसमास: (B) बहुव्रीहिसमास:

(C) तत्पुरुषसमास: (D) कर्मधारयसमास:

8. बहुव्रीहिसमासस्य सम्बद्धं पदं चिन्वन्तु। [ ]

(A) प्रमाणयुक्तम् (B) मन्दबुद्धि:

(C) बालकणाद: (D) अन्तिमावस्था

9. पीतं अंबरं यस्य स: पीताम्बर:। [ ]

रेखाङ्कितपदस्य सम्बद्धं विभक्तिं चिन्वन्तु।

(A) षष्ठीविभक्ति: (B) प्रथमाविभक्ति:

(C) द्वितीयाविभक्ति: (D) चतुर्थीविभक्ति:

10. भिषक् रूग्णस्य चिकित्सां करोति। [ ]

*रेखाङ्कितपदस्य बहुवचनरूपं चिन्वन्तु।*

(A) भिषक्षु (B) भिषज:

(C) भिषजाम् (D) भिषग्भि:

11. चित्रिक्रिष्ण: कथां अकथयत्। [ ]

*रेखाङ्कितपदस्य भविष्यत्कालरूपं चिन्वन्तु।*

(A) कथयतु (B) कथयेत्

(C) कथयति (D) कथयिष्यति

12. अहं मम मित्रं ---------। [ ]

समुचितं क्रियापदं चिन्वन्तु।

(A) मिलति (B) मिलसि

(C) मिलामि (D) मिलाम:

13. पिता धनं कोशागारे निक्षिप्य आगतवान्। [ ]

*रेखाङ्कितपदे प्रत्यय: क: ?*

(A) क्त्वा (B) ल्यप्

(C) क्त (D) शतृ

14. "क्त्वा" प्रत्ययसंबद्धं पदं चिन्वन्तु [ ]

(A) विचिन्त्य (B) प्रदर्शितम्

(C) दृष्ट्वा (D) सम्पादयितुम्

**15.** बालिका परीक्षां लिखति। [ ]

*समुचितं कर्मणिवाक्यं चिन्वन्तु।*

(A) बालिकया परीक्षा लिख्यते।

(B) बालिका परीक्षां लिख्यते।

(C) बालिका परीक्षा लिखति।

(D) बालिकया परीक्षा लिखति।

**16.** सौचिकेन वस्त्रं सीव्यते। [ ]

*समुचितं कर्तरि वाक्यं चिन्वन्तु।*

(A) सौचिकेन वस्त्रं सीवति।

(B) सौचिकः वस्त्रं सीव्यते।

(C) सौचिकः वस्त्रं सीवति।

(D) सौचिकं वस्त्रं सीव्यते।

**17.** "धनम्" इति पदस्य व्युत्पत्तिं चिन्वन्तु। [ ]

(A) धरति विश्वम्   (B) ददाति प्रतिगृह्णाति

(C) धावति प्रापयति   (D) धिनोति प्रीणयति

**18.** "मनांसि मथ्नाति" इति पदस्य व्युत्पत्यर्थं चिन्वन्तु। [ ]

(A) माता   (B) मन्मथः

(C) मातुलः   (D) मापिका

(ई) अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु। $2\times 1=2$

**19.** यदि – तर्हि ------------------------------

**20.** श्रद्धा ------------------------------

**12.** कण्वपात्रस्य वैशिष्ट्यं लिखन्तु।

*अथवा*

शठं प्रति शाठ्यं इति पाठस्य सारांशं लिखन्तु ।

(इ) अधः दत्तेभ्य प्रश्नेभ्यः **द्वयोः** समाधाने सर्जनात्मकतया लिखन्तु। *2×5=10*

**13.** भवदीयपाठशालायां प्रतिभाशालिनम् एकं विद्यार्थिनम् उद्दिश्य लिखन्तु।

**14.** नित्यव्यवहारे हीब्रूभाषां वदन्तु इति यथा एलिसरः प्रचारं कृतवान् तथा भवन्तः अपि संस्कृतविषये जनान् सूचयितुं करपत्रमेकं रचयन्तु।

**15.** अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु।

శ్రమ అనే పునాదిపైనే అభివృద్ధి భవనం ఆధారపడి ఉంటుంది. శ్రమించడానికి ఎవరూ సిగ్గుపడకూడదు. సోమరితనంతో సమాజానికి భారం కాకూడదు. శ్రమైక జీవనసౌందర్యాన్ని చూడగలగాలి. శ్రమను గౌరవంగా భావించడం నేర్చుకోవాలి. శ్రమసంస్కృతిలో జీవించడం నేర్చుకోవాలి.

---